Shri Rajarajeshvari Asatvati

# श्रीराजराजेश्वरी असत्वती स्तोत्रम्

## Document Information

Text title : Rajarajeshvari asatvatI stotram

File name : rAjarAjeshvarIasatvatIstotram.itx

Category : devii, dashamahAvidyA

Location : doc_devii

Transliterated by : Malathi Ravi

Proofread by : Malathi Ravi

Latest update : February 21, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# श्रीराजराजेश्वरी असत्वती स्तोत्रम्

ॐ नमो भवान्यै ।
ॐ छन्दःपादयुगा निरुक्तसुमुखा शिक्षा च जङ्घायुगा
ऋग्वेदोरुयुगा युजःसुजघना या सामवेदोदरा ।
तर्कन्यायकुचा श्रुतिस्मृतियुक् काव्यादिवेदानना
वेदान्तामृतलोचना भगवती श्रीराजराजेश्वरी ॥ १॥

ईशाधीश्वरयोगिवृन्दविधृता स्वानन्दभूता परा
पश्यन्तीत्यनु मध्यमा विलसती श्रीवैखरीरूपिणी ।
आत्मानात्मविचारिणी त्रिनयना विद्यावती भारती
श्रीचक्रप्रियबिन्दुतर्पणपरा श्रीराजराजेश्वरी ॥ २॥

कल्याणायुतपूर्णबिम्बवदना पूर्णेश्वरी नन्दिनी
पूर्णा पूर्णतरा परेशमहिषी पूर्णामृतास्वादिनी ।
सम्पूर्णा परमोत्तमामृतकला विद्यावती भारती
श्रीचक्रप्रियबिन्दुतर्पणपरा श्रीराजराजेश्वरी ॥ ३॥

एकाकारमनेकवर्णविविधाकारकचिद्रूपिणी
चैतन्यात्मकएकचक्ररचिता चक्राङ्गएकाकिनी ।
भावाभावविभाविनी भयहरा सद्भक्तचिन्तामणिः
श्रीचक्रप्रियबिन्दुतर्पणपरा श्रीराजराजेश्वरी ॥ ४॥

लक्ष्यालक्ष्यनिरीक्षणा निरुपमा रुद्राक्षमालाधरा
साक्षात्कारणदतवंशकलिता दीर्घातिदीर्घेश्वरी ।
भद्रा भद्र वरप्रदा भगवती भद्रेश्वरी भद्रदा
श्रीचक्रप्रियबिन्दुतर्पणपरा श्रीराजराजेश्वरी ॥ ५॥

ह्रिम्बीजानलनादबिन्दुभरिता सत्कार (ओङ्कार) नादात्मिका
ब्रह्मानन्दघनोदरी गुणवती ज्ञानेश्वरी ज्ञानदा ।
इच्छाज्ञानक्रियावती जितवती गन्धर्वसंसेविता

श्रीचक्रप्रियबिन्दुतर्पणपरा श्रीराजराजेश्वरी ॥ ६॥

हर्षोन्मत्तसुवर्णपात्रभरिता पार्थोन्नता घूर्णिता
हुङ्कारप्रियशब्दब्रह्म निरता स्वारस्वतोल्लासिनी । (हुङ्कारप्रियशब्दराशि)
सारासारविचारचारुचरिता वर्णाश्रमाकारिणी
श्रीचक्रप्रियबिन्दुतर्पणपरा श्रीराजराजेश्वरी ॥ ७॥

सर्वज्ञानकलावती सकरुणा सन्नादिनी नन्दिनी
सर्वान्तर्गतशालिनी शिवतनूसन्दीपिणी दीपिनी ।
संयोगप्रियरूपिणी प्रियवती प्रीता प्रतापोन्नता
श्रीचक्रप्रियबिन्दुतर्पणपरा श्रीराजराजेश्वरी ॥ ८॥

कर्माकर्मविवर्जिता कुलवती कर्मप्रदा कोलिनी
कारुण्यावधि सर्वकर्मनिरता सिन्धुप्रिया शालिनी ।
पूर्णब्रह्मसनातनान्तरगता ज्ञेया स्वयोगात्मिका
श्रीचक्रप्रियबिन्दुतर्पणपरा श्रीराजराजेश्वरी ॥ ९॥

हस्तिकुम्भसहक पयोधरवरा पीनोनता नम्रगा
हाराद्याभरणा सुरन्द्र विनुता शृङ्गाटपीठालया ।
योन्याकारकयोनिमुद्रितकरा नित्यं सुवर्णात्मिका
श्रीचक्रप्रियबिन्दुतर्पणपरा श्रीराजराजेश्वरी ॥ १०॥

लक्ष्मीलक्षणपूर्णकुम्भवरदा लीलाविनोदस्थिता
लाक्षारञ्जितपद्मपाद युगला ब्रह्माण्डसंसेविता ।
लोकालोकितलोककामजयिनी लोकाश्रयाकाश्रया
श्रीचक्रप्रियबिन्दुतर्पणपरा श्रीराजराजेश्वरी ॥ ११॥

ह्रीङ्कारातिशङ्करप्रियतनुः श्रीयोगपीठेश्वरी
माङ्गल्यायुतपङ्कजाभनयनामाङ्गल्यसिद्धिप्रदा ।
तारुण्यात्तपसार्चिता तरुणिका तन्त्रोपमातन्विता
श्रीचक्रप्रियबिन्दुतर्पणपरा श्रीराजराजेश्वरी ॥ १२॥

सर्वेशाङ्गविहारिणी सकरुणा सर्वेश्वरी सर्वगा
सत्या सर्वमयी सहस्र दलगा सप्तार्णवोपस्थिता ।
सङ्गासङ्ग विवर्जिता सुखकरी बालार्ककोटिप्रभा
श्रीचक्रप्रियबिन्दुतर्पणपरा श्रीराजराजेश्वरी ॥ १३॥

लक्ष्मीशादिविरि ञ्चिचक्रमुकुटाद्यष्टाङ्गपीठार्चिता
    सूर्येन्द्वग्निमयैकपीठानलया चिन्मात्रकौलेश्वरी ।
गोश्री गुर्विणिगर्विता गगनगा गङ्गा गणेशप्रिया
    श्रीचक्रप्रियबिन्दुतर्पणपरा श्रीराजराजेश्वरी ॥ १४॥

कादिक्षान्तसुवर्णबिन्दुसुतनुः स्वर्णादिसिंहासना
    नानारत्नविचित्रचित्ररचिता चातुर्यचिन्तामणिः ।
चित्तानन्दविधायिनी सुविपुला कोटित्रयीश्यम्बिका
    श्रीचक्रप्रियबिन्दुतर्पणपरा श्रीराजराजेश्वरी ॥ १५॥

ह्रीकारत्रयरूपिणी समयिनी संसारिणी हंसिनी
    वामाचारपरायणा सु-मुकुटा बीजावती मुद्रिणी ।
कामाक्षी करुणाविचित्ररचिता श्री श्री त्रिमूर्त्यात्मिका
    श्रीचक्रप्रियबिन्दुतर्पणपरा श्रीराजराजेश्वरी ॥ १६॥

साबिम्बप्रतिबिम्बलम्बित सलत् बिम्बाधरा याम्बिका
    जम्बीरोत्पलकर्णशोभतमुखा जम्बूफल श्रीकुचा ।
नानारत्नकिरीटदीप्तिलसिता प्रत्यक्षदीक्षात्मिका
    श्रीचक्रप्रियबिन्दुतर्पणपरा श्रीराजराजेश्वरी ॥ १७॥

यत्तेजो निधिमिस्त्वनन्त घृणिभिर्नोपाद्यते प्रेरितु
    हाद् ध्वान्तमपास्य सिक्षणपि तद्ध्यान मात्रा दृशा ।
यत्सद्भावादनुभाति सर्वमुदितं भानुं यथा पद्मिनी
    प्रत्यग्दाम नमाम तत्तव वपुः श्रीराजराजेश्वरी ॥ १८॥

॥ इति श्रीराजराजेश्वरी असत्वती स्तोत्रं समाप्तम् ॥

This is similar to rAjarAjeshvarImantramAtRikAstavaH, same refrain in the fourth line, however without the common anusvAras throughout. The text is different in many places. It was published by Shri Chakrishvara Mandali, Shrinagar

Encoded and proofread by Malathi Ravi

*Shri Rajarajeshvari Asatvati*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*